# Shri Mahakala Sahasranamastotra

# શ્રીમહાકાલસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : mahAkAlasahasranAmastotram 1

File name : mahAkAlasahasranAmastotra.itx

Category : sahasranAma, shiva, stotra

Location : doc_shiva

Transliterated by : Sivakumar Thyagarajan shivakumar24xi at gmail.com

Proofread by : Sivakumar Thyagarajan, DPD, NA, PSA Easwaran

Description-comments : prakRiShTanandoktAgam

Latest update : December 14, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2023

*sanskritdocuments.org*

# શ્રીમહાકાલસહસ્રનામસ્તોત્રમ્

શ્રીપ્રકૃષ્ટનન્દોક્તાગમે

ઋષિરુવાચ -
મહાકાલસહસ્રં તુ શ્રોતુમિચ્છામિ સુવ્રત! ।
કથયસ્વ પ્રસાદેન શિષ્યાય વક્તુમર્હસિ ॥ ૧॥

સૂત ઉવાચ -
સુધામયઃ સુતઃ શ્રીમાન્ સુદામા નામ વૈ દ્વિજઃ ।
તેન ગોપીપતિઃ કૃષ્ણો વિદ્યામભ્યસિતુઙ્ગતઃ ॥ ૨॥

સાન્દીપનાન્તિકેઽવન્ત્યાં ગતૌ તૌ પઠનાર્થિનૌ ।
ચતુઃષષ્ટિઃ કલાઃ સર્વાઃ કૃતા વિદ્યાશ્ચતુર્દશ ॥ ૩॥

એકદા પ્રાહ કૃષ્ણં સ સુદામા દ્વિજસત્તમઃ ।
સુદામોવાચ -
મહાકાલં પ્રતિબિલ્વં કેન મન્ત્રેણ વાઽર્પણમ્ ॥ ૪॥

કરોમિ વદ મે કૃષ્ણ ! કૃપયા સાત્ત્વતામ્પતે ! ।
શ્રીકૃષ્ણ ઉવાચ -
શ‍ૃણુ મિત્ર! મહાપ્રાજ્ઞ! કથયામિ તવાગ્રતઃ ॥ ૫॥

સહસ્રં કાલકાલસ્ય મહાકાલસ્ય વૈ દ્વિજ ! ।
સુગોપ્યં સર્વદા વિપ્ર! ભક્તાયાભાષિતં મયા ॥ ૬॥

કુરુ બિલ્વાર્પણં તેન યેન ત્વં વિન્દસે સુખમ્ ।
સહસ્રસ્યાસ્ય ઋષ્યોઽહં છન્દોઽનુષ્ટુપ્ તથૈવ ચ ॥ ૭॥

દેવઃ પ્રોક્તો મહાકાલો વિનિયોગશ્ચ સિદ્ધયે ।
સઙ્કલ્પ્યૈવં તતો ધ્યાયેન્મહાકાલવિભું મુદા ॥ ૮॥

વિનિયોગઃ ।

ૐ અસ્ય શ્રીમહાકાલસહસ્રનામસ્તોત્રમાલામન્ત્રસ્ય શ્રીકૃષ્ણઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । શ્રીમહાકાલો દેવતા । ૐ બીજમ્ । નમઃ શક્તિઃ ।
મહાકાલાયેતિ કીલકમ્ । સર્વાર્થસિદ્ધ્યર્થે પાઠે વિનિયોગઃ ।
ઋષ્યાદિન્યાસઃ ।
ૐ શ્રીકૃષ્ણર્ષયે નમઃ શિરસિ । અનુષ્ટુપ્છન્દસે નમઃ મુખે ।
મહાકાલદેવતાયૈ નમઃ હૃદયે । ૐ બીજાય નમઃ ગુહ્યે ।
નમઃ શક્તયે નમઃ પાદયોઃ । મહાકાલાયેતિ કીલકાય નમઃ નાભૌ ॥

શ્રીમહાકાલપ્રીત્યર્થે સહસ્રનામસ્તોત્રપાઠે વિનિયોગાય નમઃ સર્વાઙ્ગે ॥

કરન્યાસઃ એવં હૃદયાદિન્યાસઃ ॥

કરન્યાસઃ ।
ૐ અઙ્ગુષ્ઠાભ્યાં નમઃ । મહાકાલાય તર્જનીભ્યાં નમઃ ।
નમઃ મધ્યમાભ્યાં નમઃ । ૐ અનામિકાભ્યાં નમઃ ।
મહાકાલાય કનિષ્ઠિકાભ્યાં નમઃ ।
નમઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અઙ્ગન્યાસઃ ।
ૐ હૃદયાય નમઃ । મહાકાલાય શિરસે સ્વાહા ।
નમઃ શિખાયૈ વષટ્ । ૐ કવચાય હુમ્ ।
મહાકાલાય નેત્રત્રયાય વૌષટ્ । નમઃ અસ્ત્રાય ફટ્ ।
વ્યાપકન્યાસઃ ૐ મહાકાલાય નમઃ ॥

અથ ધ્યાનં
કુઙ્કુમાગરુકસ્તૂરીકેશરેણ વિચર્ચિતમ્ ।
નાનાપુષ્પસ્રજાલઙ્કૃદ્બિલ્વમૌલિવલાન્વિતમ્ ॥ ૯॥

પુરો નન્દી સ્થિતો વામે ગિરિરાજકુમારિકા ।
બ્રાહ્મણૈરાવૃતં નિત્યં મહાકાલમહં ભજે ॥ ૧૦॥

॥ ઇતિ ધ્યાનમ્ ॥

અથ સહસ્રનામસ્તોત્રમ્ ।
ૐ મહાકાલો મહારૂપો મહાદેવો મહેશ્વરઃ ।
મહાપ્રાજ્ઞો મહાશમ્ભુર્મહેશો મોહભઞ્જનઃ ॥ ૧૧॥

માન્યો મન્મથહન્તા ચ મોહનો મૃત્યુનાશનઃ ।

માન્યદો માધવો મોક્ષો મોક્ષદો મરણાપહા ॥ ૧૨॥

મુહૂર્તો મુનિવન્દ્યશ્ચ મનુરૂપો મનુર્મનુઃ ।
મન્મથારિર્મહાપ્રાજ્ઞો મનોનન્દો મમત્વહા ॥ ૧૩॥

મુનીશો મુનિકર્તા ચ મહત્ત્વં મહદાધિપઃ ।
મૈનાકો મૈનકાવન્દ્યો મધ્વરિપ્રાણવલ્લભઃ ॥ ૧૪॥

મહાલયેશ્વરો મોક્ષો મેઘનાદેશ્વરાભિધઃ ।
મુક્તીશ્વરો મહામુક્તો મન્ત્રજ્ઞો મન્ત્રકારકઃ ॥ ૧૫॥

મઙ્ગલો મઙ્ગલાધીશો મધ્યદેશપતિર્મહાન્ ।
માગધો મન્મથો મત્તો માતઙ્ગો માલતીપતિઃ ॥ ૧૬॥

માથુરો મથુરાનાથો માલવાધીશમન્યુપઃ ।
મારુતિર્મીનપો મૌનો માર્કણ્ડો મણ્ડલો મૃડઃ ॥ ૧૭॥

મધુપ્રિયો મધુસ્નાયી મિષ્ટભોજી મૃણાલધૃક્ ।
મઞ્જુલો મલ્લમોદજ્ઞો મોદકૃન્મોદદાયકઃ ॥ ૧૮॥

મુક્તિદો મુક્તરૂપશ્ચ મુક્તામાલાવિભૂષિતઃ ।
મૃકણ્ડો મોદપો મોદો મોદકાશનકારકઃ ॥ ૧૯॥

યજ્ઞો યજ્ઞપતિર્યજ્ઞો યજ્ઞેશો યજ્ઞનાશનઃ ।
યજ્ઞતેજા યશો યોગી યોગીશો યોગદાયકઃ ॥ ૨૦॥

યતિરૂપો યાજ્ઞવલ્ક્યો યજ્ઞકૃદ્ યજ્ઞલુમ્પહા ।
યજ્ઞમૃદ્ યજ્ઞહા યજ્ઞો યજ્ઞભુગ્ યજ્ઞસાધકઃ ॥ ૨૧॥

યજ્ઞાઙ્ગો યજ્ઞહોતા ચ યજ્વાનો યજનો યતિઃ ।
યશઃપ્રદો યશઃકર્તા યશો યજ્ઞોપવીતધૃક્ ॥ ૨૨॥

યજ્ઞસેનો યાજ્ઞિકશ્ચ યશોદાવરદાયકઃ ।
યમેશો યમકર્તા ચ યમદૂતનિવારણઃ ॥ ૨૩॥

યાચકો યમુનાક્રીડો યાજ્ઞસેનીહિતપ્રદઃ ।
યવપ્રિયો યવરૂપો યવનાન્તો યવી યવઃ ॥ ૨૪॥

ઋગ્વેદો રોગહન્તા ચ રન્તિદેવો રણાગ્રણીઃ ।
રૈવતો રૈવતાધીશો રૈવતેશ્વરસંજ્ઞકઃ ॥ ૨૫॥

રામેશ્વરો રકારશ્ચ રામપ્રિયો રમાપ્રિયઃ ।
રણી રણહરો રક્ષો રક્ષકો ઋણહારકઃ ॥ ૨૬॥

રક્ષિતા રાજરૂપો રાટ્ રવો રૂપો રજઃપ્રદઃ ।
રામચન્દ્રપ્રિયો રાજા રક્ષોઘ્નો રાક્ષસાધિપઃ ॥ ૨૭॥

રક્ષસાં વરદો રામો રાક્ષસાન્તકરો રથી ।
રથપ્રિયો રથસ્થાયી રથહા રથહારકઃ ॥ ૨૮॥

રાવણપ્રિયકૃદ્રાવસ્વરૂપશ્ચ ઋતૂરજઃ ॥

રતિવરપ્રદાતા ચ રન્તિદેવવરપ્રદઃ ॥ ૨૯॥

રાજધાનીપ્રદો રેતો રેવાભઞ્જો રવી રજી ।
ઋત્વિજો રસકર્તા ચ રસજ્ઞો રસદાયકઃ ॥ ૩૦॥

રુદ્રો રુદ્રાક્ષધૃગ્રૌદ્રો રત્નો રત્નૈર્વિભૂષિતઃ ।
રૂપેશ્વરો રમાપૂજ્યો રુરુરાજ્યસ્થલેશ્વરઃ ॥ ૩૧॥

લક્ષો લક્ષપતિર્લિઙ્ગો લડ્ડુકો લડ્ડુકપ્રિયઃ ।
લીલામ્બરધરો લાભો લાભદો લાભકૃત્સદા ॥ ૩૨॥

લજ્જારક્ષો લઘુરૂપો લેખકો લેખકપ્રિયઃ ।
લાઙ્ગલો લવણાબ્ધીશો લક્ષ્મીપૂજિતલક્ષકઃ ॥ ૩૩॥

લોકપાલેશ્વરો લમ્પો લડ્ડેશો લમ્પકેશ્વરઃ ।
વહ્નિર્નેત્રો વરાઙ્ગશ્ચ વસુરૂપો વસુપ્રદઃ ॥ ૩૪॥

વરેણ્યો વરદો વેદો વેદવેદાઙ્ગપારગઃ ।
વૃદ્ધકાલેશ્વરો વૃદ્ધો વિભવો વિભવપ્રદઃ ॥ ૩૫॥

વેણુગીતપ્રિયો વૈદ્યો વારાણસીસ્થિતઃ સદા ।
વિશ્વેશો વિશ્વકર્તા ચ વિશ્વનાથો વિનાયકઃ ॥ ૩૬॥

વેદજ્ઞો વર્ણકૃદ્વર્ણો વર્ણાશ્રમફલપ્રદઃ ।
વિશ્વવન્દ્યો વિશ્વવેત્તા વિશ્વાવસુર્વિભાવસુઃ ॥ ૩૭॥

વિત્તરૂપો વિત્તકર્તા વિત્તદો વિશ્વભાવનઃ ।
વિશ્વાત્મા વૈશ્વદેવશ્ચ વનેશો વનપાલકઃ ॥ ૩૮॥

વનવાસી વૃષસ્થાયી વૃષભો વૃષભપ્રિયઃ ।

વિલ્વીદલપ્રિયો વિલ્વો વિશાલનેત્રસંસ્થિતઃ ॥ ૩૯॥

વૃષધ્વજો વૃષાધીશો વૃષભેશો વૃષપ્રિયઃ ।
વિલ્વેશ્વરો વરો વીરો વીરેશશ્ચ વનેશ્વરઃ ॥ ૪૦॥

વિભૂતિભૂષિતો વેણ્યો વ્યાલયજ્ઞોપવીતકઃ ।
વિશ્વેશ્વરો વરાનન્દો વટરૂપો વટેશ્વરઃ ॥ ૪૧॥

સર્વેશઃ સત્ત્વઃ સારઙ્ગો સત્ત્વરૂપઃ સનાતનઃ ।
સદ્ગન્ધઃ સચ્ચિદાનન્દઃ સદાનન્દઃ શિવપ્રિયઃ ॥ ૪૨॥

શિવદઃ શિવકૃત્સામ્બઃ શશિશેખરશોભનઃ ।
શરણ્યઃ સુખદઃ સેવ્યઃ શતાનન્દવરપ્રદઃ ॥ ૪૩॥

સાત્ત્વિકઃ સાત્ત્વતઃ શમ્ભુઃ શઙ્કરઃ સર્વગઃ શિવઃ ।
સેવાફલપ્રદાતા ચ સેવકપ્રતિપાલકઃ ॥ ૪૪॥

શત્રુઘ્નઃ સામગઃ શૌરિઃ સેનાનીઃ શર્વરીપ્રિયઃ ।
શ્મશાની સ્કન્દસદ્વેદઃ સદા સુરસરિત્પ્રિયઃ ॥ ૪૫॥

સુદર્શનધરઃ શુદ્ધઃ સર્વસૌભાગ્યદાયકઃ ।
સૌભાગ્યઃ સુભગઃ સૂરઃ સૂર્યઃ સારઙ્ગમુક્તિદઃ ॥ ૪૬॥

સપ્તસ્વરશ્ચ સપ્તાશ્વઃ સપ્તઃ સપ્તર્ષિપૂજિતઃ ।
શિતિકણ્ઠઃ શિવાધીશઃ સઙ્ગમઃ સઙ્ગમેશ્વરઃ ॥ ૪૭॥

સોમેશઃ સોમતીર્થેશઃ સર્પધૃક્સ્વર્ણકારકઃ ।
સ્વર્ણજાલેશ્વરઃ સિદ્ધઃ સિદ્ધેશઃ સિદ્ધિદાયકઃ ॥ ૪૮॥

સર્વસાક્ષી સર્વરૂપઃ સર્વજ્ઞઃ શાસ્ત્રસંસ્કૃતઃ ।
સૌભાગ્યેશ્વરઃ સિંહસ્થઃ શિવેશઃ સિંહકેશ્વરઃ ॥ ૪૯॥

શૂલેશ્વરઃ શુકાનન્દઃ સહસ્રધેનુકેશ્વરઃ ।
સ્યન્દનસ્થઃ સુરાધીશઃ સનકાદ્યર્ચિતઃ સુધીઃ ॥ ૫૦॥

ષડૂર્મિઃ ષટ્ ।સુચક્રજ્ઞઃ ષટ્ચક્રકવિભેદકઃ ।
ષડાનનઃ ષડઙ્ગજ્ઞઃ ષડ્રસજ્ઞઃ ષડાનનઃ ॥ ૫૧॥

હરો હંસો હતારાતિર્હિરણ્યો હાટકેશ્વરઃ ।
હેરમ્બો હવનો હોતા હયરૂપો હયપ્રદઃ ॥ ૫૨॥

હસ્તિદો હસ્તિત્વગ્ધારી હાહાહૂહૂવરપ્રદઃ ।
હવ્યહેમહવિષ્યાન્નો હાટકેશો હવિઃપ્રિયઃ ॥ ૫૩॥

હિરણ્યરેતા હંસજ્ઞો હિરણ્યો હાટકેશ્વરઃ ।
હનુમદીશો હરો હર્ષો હરસિદ્ધિપીઠગઃ ॥ ૫૪॥

હૈમો હૈમાલયો હૂહૂહાહાહેતુર્હઠો હઠી ।
ક્ષત્રઃ ક્ષત્રપ્રદઃ ક્ષત્રી ક્ષેત્રજ્ઞઃ ક્ષેત્રનાયકઃ ॥ ૫૫॥

ક્ષેમઃ ક્ષેમપ્રદાતા ચ ક્ષાન્તિકૃત્ ક્ષાન્તિવર્ધનઃ ।
ક્ષીરાર્ણવઃ ક્ષીરભોક્તા ક્ષિપ્રાકૂલક્ષિતેઃ પતિઃ ॥ ૫૬॥

ક્ષૌદ્રરસપ્રિયઃ ક્ષીરઃ ક્ષિપ્રસિદ્ધિપ્રદઃ સદા ।
જ્ઞાનો જ્ઞાનપ્રદો જ્ઞેયો જ્ઞાનાતીતો જ્ઞપો જ્ઞયઃ ॥ ૫૭॥

જ્ઞાનરૂપો જ્ઞાનગમ્યો જ્ઞાની જ્ઞાનવતાંવરઃ ।
અજો હ્યનન્તશ્ચાવ્યક્ત આદ્ય આનન્દદાયકઃ ॥ ૫૮॥

અકથ આત્મા હ્યાનન્દશ્ચાજેયો હ્યજ આત્મભૂઃ ।
આદ્યરૂપો હ્યરિચ્છેત્તાઽનામયશ્ચાપ્યલૌકિકઃ ॥

અતિરૂપો હ્યખણ્ડાત્મા ચાત્મજ્ઞાનરતઃ સદા ।
આત્મવેત્તા હ્યાત્મસાક્ષી અનાદિશ્ચાન્તરાત્મગઃ ॥ ૬૦॥

આનન્દેશોઽવિમુક્તેશશ્ચાલર્કેશોઽપ્સરેશ્વરઃ ।
આદિકલ્પેશ્વરોઽગસ્ત્યશ્ચાક્રૂરેશોઽરુણેશ્વરઃ ॥ ૬૧॥

ઇડારૂપ ઇભચ્છેત્તા ઈશ્વરશ્ચેન્દિરાર્ચિતઃ ।
ઇન્દુરિન્દીવરશ્ચેશ ઈશાનેશ્વર ઈર્ષહા ॥ ૬૨॥

ઇજ્ય ઇન્દીવરશ્ચેભ ઇક્ષુરિક્ષુરસપ્રિયઃ ।
ઉમાકાન્ત ઉમાસ્વામી તથોમાયાઃ પ્રમોદકૃત્ ॥ ૬૩॥

ઉર્વશીવરદશ્ચૈવ ઉચ્ચૈરુત્તુઙ્ગધારકઃ ।
એકરૂપ એકસ્વામી હ્યેકાત્મા ચૈકરૂપવાન્ ॥ ૬૪॥

ઐરાવત ઐસ્થિરાત્મા ચૈકારૈશ્વર્યદાયકઃ ।
ઓકાર ઓજસ્વાંશ્ચૈવ હ્યૌખરશ્ચૌખરાધિપઃ ॥ ૬૫॥

ઔષધ્ય ઔષધિજ્ઞાતા હ્યોજોદ ઔષધીશ્વરઃ ।
અનન્તો હ્યન્તકશ્ચાન્તો હ્યન્ધકાસુરસૂદનઃ ॥ ૬૬॥

અચ્યુતશ્ચાપ્રમેયાત્મા અક્ષરશ્ચાશ્વદાયકઃ ।
અરિહન્તા હ્યવન્તીશશ્ચાહિભૂષણભૃત્સદા ॥ ૬૭॥

અવન્તીપુરવાસી ચાપ્યવન્તીપુરપાલકઃ ।
અમરશ્ચામરાધીશો હ્યમરારિવિહિંસકઃ ॥ ૬૮॥

કામહા કામકામશ્ચ કામદઃ કરુણાકરઃ ।
કારુણ્યઃ કમલાપૂજ્યઃ કપાલી કલિનાશનઃ ॥ ૬૯॥

કામારિકૃત્કલ્લોલઃ કાલિકેશશ્ચ કાલજિત્ ।
કપિલઃ કોટિતીર્થેશઃ કલ્પાન્તઃ કાલહા કવિઃ ॥ ૭૦॥

કાલેશ્વરઃ કાલકર્તા કલ્પાબ્ધિઃ કલ્પવૃક્ષકઃ ।
કોટીશઃ કામધેન્વીશઃ કુશલઃ કુશલપ્રદઃ ॥ ૭૧॥

કિરીટી કુણ્ડલી કુન્તી કવચી કર્પરપ્રિયઃ ।
કર્પૂરાભઃ કલાદક્ષઃ કલાજ્ઞઃ કિલ્બિષાપહા ॥ ૭૨॥

કુક્કુટેશઃ કર્કટેશઃ કુલદઃ કુલપાલકઃ ।
કઞ્જાભિલાષી કેદારઃ કુઙ્કુમાર્ચિતવિગ્રહઃ ॥ ૭૩॥

કુન્દપુષ્પપ્રિયઃ કઞ્જઃ કામારિઃ કામદાહકઃ ।
કૃષ્ણરૂપઃ કૃપારૂપશ્ચાથ કૃષ્ણાર્ચિતાઙ્ઘ્રિકઃ ॥ ૭૪॥ ।

કુણ્ડઃ કુણ્ડેશ્વરઃ કાણ્વઃ કેશવૈઃ પરિપૂજિતઃ ।
કામેશ્વરઃ કલાનાથઃ કણ્ઠેશઃ કુઙ્કુમેશ્વરઃ ॥ ૭૫॥

કન્થડેશઃ કપાલેશઃ કાયાવરોહણેશ્વરઃ ।
કરભેશઃ કુટુમ્બેશઃ કર્કેશઃ કૌશલેશ્વરઃ ॥ ૭૬॥

કોશદઃ કોશભૃત્ કોશઃ કૌશેયઃ કૌશિકપ્રિયઃ ।
ખચરઃ ખચરાધીશઃ ખચરેશઃ ખરાન્તકઃ ॥ ૭૭॥

ખેચરૈઃ પૂજિતપદઃ ખેચરીસેવકપ્રિયઃ ।
ખણ્ડેશ્વરઃ ખડ્ગરૂપઃ ખડ્ગગ્રાહી ખગેશ્વરઃ ॥ ૭૮॥

ખેટઃ ખેટપ્રિયઃ ખણ્ડઃ ખણ્ડપાલઃ ખલાન્તકઃ ।
ખાણ્ડવઃ ખાણ્ડવાધીશઃ ખડ્ગતાસઙ્ગમસ્થિતઃ ॥ ૭૯॥

ગિરિશો ગિરિજાધીશો ગજારિત્વગ્વિભૂષિતઃ ।

ગૌતમો ગિરિરાજશ્ચ ગઙ્ગાધરો ગુણાકરઃ ॥ ૮૦॥

ગૌતમીતટવાસી ચ ગાલવો ગોપતીશ્વરઃ ।
ગોકર્ણો ગોપતિર્ગર્વો મજારિર્ગરુડપ્રિયઃ ॥ ૮૧॥

ગઙ્ગામૌલિર્ગુણગ્રાહી ગારુડીવિદ્યયા યુતઃ ।
ગુરોર્ગુરુર્ગજારાતિર્ગોપાલો ગોમતીપ્રિયઃ ॥ ૮૨॥

ગુણદો ગુણકર્તા ચ ગણેશો ગણપૂજિતઃ ।
ગણકો ગૌરવો ગર્ગો ગન્ધર્વેણ પ્રપૂજિતઃ ॥ ૮૩॥

ગોરક્ષો ગુર્વિણીત્રાતા ગેહો ગેહપ્રદાયકઃ ।
ગીતાધ્યાયી ગયાધીશો ગોપતિર્ગીતમોહિતઃ ॥ ૮૪॥

ગિરાતીતો ગુણાતીતો ગઙઃગેશો ગુહ્યકેશ્વરઃ ।
ગ્રહો ગ્રહપતિર્ગમ્યો ગ્રહપીડાનિવારણઃ ॥ ૮૫॥

ઘટનાદિર્ઘનાધારો ઘનેશ્વરો ઘનાકરઃ ।
ઘુશ્મેશ્વરો ઘનાકારો ઘનરૂપો ઘનાગ્રણીઃ ॥ ૮૬॥

ઘણ્ટેવરો ઘટાધીશો ઘર્ઘરો ઘસ્મરાપહા ।
ઘુષ્મેશો ઘોષકૃદ્ઘોષી ઘોષાઘોષો ઘનધ્વનિઃ ॥ ૮૭॥

ઘૃતપ્રિયો ઘૃતાબ્ધીશો ઘણ્ટો ઘણ્ટઘટોત્કચઃ ।
ઘટોત્કચાય વરદો ઘટજન્મા ઘટેશ્વરઃ ॥ ૮૮॥

ઘકારો ઙકૃતો ઙશ્ચ ઙકારો ઙકૃતાઙ્ગજઃ ।
ચરાચરશ્ચિદાનન્દશ્ચિન્મયશ્ચન્દ્રશેખરઃ ॥ ૮૯॥

ચન્દ્રેશ્વરશ્ચામરેશશ્ચામરેણ વિભૂષિતઃ ।
ચામરશ્ચામરાધીશશ્ચરાચરપતિશ્ચિરઃ ॥ ૯૦॥

ચમત્કૃતશ્ચન્દ્રવર્ણશ્ચર્મભૃચ્ચર્મ ચામરી ।
ચાણક્યશ્ચર્મધારી ચ ચિરચામરદાયકઃ ॥ ૯૧॥

ચ્યવનેશશ્ચરુશ્ચારુશ્ચન્દ્રાદિત્યેશ્વરાભિધઃ ।
ચન્દ્રભાગાપ્રિયશ્ચણ્ડશ્ચામરૈઃ પરિવીજિતઃ ॥ ૯૨॥

છત્રેશ્વરશ્છત્રધારી છત્રદશ્છલહા છલી ।
છત્રેશશ્છત્રકૃચ્છત્રી છન્દવિચ્છન્દદાયકઃ ॥ ૯૩॥

જગન્નાથો જનાધારો જગદીશો જનાર્દનઃ ।
જાહ્નવીધૃગ્જગત્કર્તા જગન્મયો જનાધિપઃ ॥ ૯૪॥

જીવો જીવપ્રદાતા ચ જેતાડથો જીવનપ્રદઃ ।
જઙ્ગમશ્ચ જગદ્ધાતા જગત્કેનપ્રપૂજિતઃ ॥ ૯૫॥

જટાધરો જટાજૂટી જટિલો જલરૂપધૃક્ ।
જાલન્ધરશિરશ્છેત્તા જલજાઙ્ઘ્રિર્જગત્પતિઃ ॥ ૯૬॥

જનત્રાતા જગન્નિધિર્જટેશ્વરો જલેશ્વરઃ ।
ઝર્ઝરો ઝરણાકારી ઝૂઞ્ઝકૃત્ ઝૂઝહા ઝરઃ ॥ ૯૭॥

ઞકારશ્ચ ઞમુવાસી ઞજનપ્રિયકારકઃ ।
ટકારશ્ચ ઠકારશ્ચ ડામરો ડમરુપ્રિયઃ ॥ ૯૮॥

ડણ્ડધૃઙ્મરુહસ્તો ડાકિહૃડુમકેશ્વરઃ ।
ઢુણ્ઢો ઢુણ્ઢેશ્વરો ઢક્કો ઢક્કાનાદપ્રિયઃ સદા ॥ ૯૯॥

ણકારો ણસ્વરૂપશ્ચ ણુણોણિણોણકારણઃ ।
તન્ત્રજ્ઞસ્ત્ર્યમ્બકસ્તન્ત્રીતુમ્બુરુસ્તુલસીપ્રિયઃ ॥ ૧૦૦॥

તૂણીરધૃક્ તદાકારસ્તાણ્ડવી તાણ્ડવેશ્વરઃ ।
તત્ત્વજ્ઞસ્તત્ત્વરૂપશ્ચ તાત્ત્વિકસ્તરવિપ્રભઃ ॥ ૧૦૧॥

ત્રિનેત્રસ્તરુણસ્તત્ત્વસ્તકારસ્તલવાસકૃત્ ।
તેજસ્વી તેજોરૂપી ચ તેજઃપુઞ્જપ્રકાશકઃ ॥ ૧૦૨॥

તાન્ત્રિકસ્તન્ત્રકર્તા ચ તન્ત્રવિધાપ્રકાશકઃ ।
તામ્રરૂપસ્તદાકારસ્તત્ત્વદસ્તરણિપ્રિયઃ ॥ ૧૦૩॥

તાન્ત્રેયસ્તમોહા તન્વી તામસસ્તામસાપહા ।
તામ્રસ્તામ્રપ્રદાતા ચ તામ્રવર્ણસ્તરુપ્રિયઃ ॥ ૧૦૪॥

તપસ્વી તાપસી તેજસ્તેજોરૂપસ્તલપ્રિયઃ ।
તિલસ્તિલપ્રદાતા ચ તૂલસ્તૂલપ્રદાયકઃ ॥ ૧૦૫॥

તાપીશસ્તામ્રપર્ણીશસ્તિલકસ્ત્રાણકારકઃ ।
ત્રિપુરઘ્નસ્ત્રયાતીતસ્ત્રિલોચનસ્ત્રિલોકપઃ ॥ ૧૦૬॥

ત્રિવિષ્ટપેશ્વરસ્તેજસ્ત્રિપુરસ્ત્રિપુરદાહકઃ ।
તીર્થસ્તારાપતિસ્ત્રાતા તાડિકેશસ્તડિજ્જવઃ ॥ ૧૦૭॥

થકારશ્ચ સ્થુલાકારઃ સ્થૂલઃ સ્થવિરઃ સ્થાનદઃ ।
સ્થાણુઃ સ્થાયી સ્થાવરેશઃ સ્થમ્ભઃ સ્થાવરપીડહા ॥ ૧૦૮॥

સ્થૂલરૂપસ્થિતેઃ કર્તા સ્થૂલદુઃખવિનાશનઃ ।
થન્દિલસ્થદલઃ સ્થાલ્યઃ સ્થલકૃત્ સ્થલભૃત્ સ્થલી ॥ ૧૦૯॥

સ્થલેશ્વરઃ સ્થલાકારઃ સ્થલાગ્રજઃ સ્થલેશ્વરઃ ।
દક્ષો દક્ષહરો દ્રવ્યો દુન્દુભિર્વરદાયકઃ ॥ ૧૧૦॥

દેવો દેવાગ્રજો દાનો દાનવારિર્દિનેશ્વરઃ ।
દેવકૃદ્દેવભૃદ્દાતા દયારૂપી દિવસ્પતિઃ ॥ ૧૧૧॥

દામોદરો દલાધારો દુગ્ધસ્નાયી દધિપ્રિયઃ ।
દેવરાજો દિવાનાથો દેવજ્ઞો દેવતાપ્રિયઃ ॥ ૧૧૨॥

દેવદેવો દાનરૂપો દૂર્વાદલપ્રિયઃ સદા ।
દિગ્વાસા દરભો દન્તો દરિદ્રઘ્નો દિગમ્બરઃ ॥ ૧૧૩॥

દીનબન્ધુર્દુરારાધ્યો દુરન્તો દુષ્ટદર્પહા ।
દક્ષઘ્નો દક્ષહન્તા ચ દક્ષજામાત દેવજિત્ ॥ ૧૧૪॥

દ્વન્દ્વહા દુઃખહા દોગ્ધા દુર્ધરો દુર્ધરેશ્વરઃ ।
દાનાપ્તો દાનભૃદ્દીપ્તદીપ્તિર્દિવ્યો દિવાકરઃ ॥ ૧૧૫॥

દમ્ભહા દમ્ભકૃદ્દમ્ભી દક્ષજાપતિર્દીપ્તિમાન્ ।
ધન્વી ધનુર્ધરો ધીરો ધાન્યકૃદ્ધાન્યદાયકઃ ॥ ૧૧૬॥

ધર્માધર્મભૃતો ધન્યો ધર્મમૂર્તિર્ધનેશ્વરઃ ।
ધનદો ધૂર્જટિર્ધાન્યો ધામદો ધાર્મિકો ધની ॥ ૧૧૭॥

ધર્મરાજો ધનાધારો ધરાધરો ધરાપતિઃ ।
ધનુર્વિદ્યાધરો ધૂર્તો ધૂલિધૂસરવિગ્રહઃ ॥ ૧૧૮॥

ધનુષો ધનુષાકારો ધનુર્ધરભૃતાંવરઃ ।
ધરાનાથો ધરાધીશો ધનેશો ધનદાગ્રજઃ ॥ ૧૧૯॥

ધર્મભૃદ્ધર્મસન્ત્રાતા ધર્મરક્ષો ધનાકરઃ ।
નર્મદો નર્મદાજાતો નર્મદેશો નૃપેશ્વરઃ ॥ ૧૨૦॥

નાગભૃન્નાગલોકેશો નાગભૂષણભૂષિતઃ ।

નાગયજ્ઞોપવીતેયો નગો નાગારિપૂજિતઃ ॥ ૧૨૧॥

નાન્યો નરવરો નેમો નૂપુરો નૂપુરેશ્વરઃ ।
નાગચણ્ડેશ્વરો નાગો નગનાથો નગેશ્વરઃ ॥ ૧૨૨॥

નીલગઙ્ગાપ્રિયો નાદો નવનાથો નગાધિપઃ ।
પૃથુકેશઃ પ્રયાગેશઃ પત્તનેશઃ પરાશરઃ ॥ ૧૨૩॥

પુષ્પદન્તેશ્વરઃ પુષ્પઃ પિઙ્ગલેશ્વરપૂર્વજઃ ।
પિશાચેશઃ પન્નગેશઃ પશુપતીશ્વરઃ પ્રિયઃ ॥ ૧૨૪॥

પાર્વતીપૂજિતઃ પ્રાણઃ પ્રાણેશઃ પાપનાશનઃ ।
પાર્વતીપ્રાણનાથશ્ચ પ્રાણભૃત્ પ્રાણજીવનઃ ॥ ૧૨૫॥

પુરાણપુરુષઃ પ્રાજ્ઞઃ પ્રેમજ્ઞઃ પાર્વતીપતિઃ ।
પુષ્કરઃ પુષ્કરાધીશઃ પાત્રઃ પાત્રૈઃ પ્રપૂજિતઃ ॥ ૧૨૬॥

પુત્રદઃ પુણ્યદઃ પૂર્ણઃ પાટામ્બરવિભૂષિતઃ ।
પદ્માક્ષઃ પદ્મસ્રગ્ધારી પદ્મેન પરિશોભિતઃ ॥ ૧૨૭॥

ફણિભૃત્ ફણિનાથશ્ચ ફેનિકાભક્ષકારકઃ ।
સ્ફટિકઃ ફર્શુધારી ચ સ્ફટિકાભો ફલપ્રદઃ ॥ ૧૨૮॥

બદ્રીશો બલરૂપશ્ચ બહુભોજી બટુર્બટુઃ ।
બાલખિલ્યાર્ચિતો બાલો બ્રહ્મેશો બ્રાહ્મણાર્ચિતઃ ॥ ૧૨૯॥

બ્રાહ્મણો બ્રહ્મહા બ્રહ્મા બ્રહ્મજ્ઞો બ્રાહ્મણપ્રિયઃ ।
બ્રાહ્મણસ્થો બ્રહ્મરૂપો બ્રાહ્મણપરિપાલકઃ ॥ ૧૩૦॥

બ્રહ્મમૂર્તિર્બ્રહ્મસ્વામી બ્રાહ્મણૈઃ પરિશોભિતઃ ।
બ્રાહ્મણારિહરો બ્રહ્મ બ્રાહ્મણાસ્યૈઃ પ્રતર્પિતઃ ॥ ૧૩૧॥

ભૂતેશો ભૂતનાથશ્ચ ભસ્માઙ્ગો ભીમવિક્રમઃ ।
ભીમો ભવહરો ભવ્યો ભૈરવો ભયભઞ્જનઃ ॥ ૧૩૨॥

ભૂતિદો ભુવનાધારો ભુવનેશો ભૃગુર્ભવઃ ।
ભારતીશો ભુજઙ્ગેશો ભાસ્કરો ભિન્દિપાલધૃક્ ॥ ૧૩૩॥

ભૂતો ભયહરો ભાનુર્ભાવનો ભવનાશનઃ ।
સહસ્રનામભિશ્ચૈતૈર્મહાકાલઃ પ્રસીદતુ ॥ ૧૩૪॥

અથ મહાકાલસહસ્રનામમાહાત્મ્યમ્ ।

સૂત ઉવાચ -

ઇતીદં કીર્તિતં તેભ્યો મહાકાલસહસ્રકમ્ ।
પઠનાત્ શ્રવણાત્ સદ્યો ધૂતપાપો ભવેન્નરઃ ॥ ૧૩૫॥

એકવારં પઠેન્નિત્યં સર્વસત્યં પ્રજાયતે ।
દ્વિવારં યઃ પઠેત્ સત્યં તસ્ય વશ્યં ભવેજ્જગત્ ॥ ૧૩૬॥

ત્રિવારં પઠનાન્મર્ત્યો ધનધાન્યયુતો ભવેત્ ।
અતઃ સ્થાનવિશેષસ્યેદાનીં પાઠફલં શૃણુ ॥ ૧૩૭॥

વટમૂલે -

વટમૂલે પઠેન્નિત્યમેકાકી મનુજો યદિ ।
ત્રિવારઞ્ચ દિનત્રિંશત્સિદ્ધિર્ભવતિ સર્વથા ॥ ૧૩૮॥

મનોરથસિદ્ધૌ -

અશ્વત્થે તુલસીમૂલે તીર્થે વા હરિહરાલયે ।
શુચિર્ભૂત્વા પઠેદ્યો હિ મનસા ચિન્તિતં લભેત્ ॥ ૧૩૯॥

સિદ્ધિદતીર્થે -

યત્ર તીર્થોઽસ્તિ ચાશ્વત્થો વટો વા દ્વિજસત્તમ!
સ તીર્થઃ સિદ્ધિદઃ સર્વપાઠકસ્ય ન સંશયઃ ॥ ૧૪૦॥

તત્રૈકાગ્રમના ભૂત્વા યઃ પઠેચ્છુભમાનસઃ ।
યં યં કામમભિધ્યાયેત્તં તં પ્રાપ્નોતિ નિશ્ચિતમ્ ॥ ૧૪૧॥

મનસા ચિન્તિતં સર્વં મહાકાલપ્રસાદતઃ ।
લભતે સકલાન્ કામાન્ પઠનાચ્છ્રવણાન્નરઃ ॥ ૧૪૨॥

શતાવર્તપાઠફલં -

શતાવર્તં પઠેદ્યત્ર ચિન્તિતં લભતે ધ્રુવમ્ ।
દુઃસાધ્યઃ સોઽપિ સાધ્યઃ સ્યાદ્દિનાન્યેકોનવીંશતેઃ ॥ ૧૪૩॥

મહાશિવરાત્રૌ પાઠફલમ્ ।

શિવરાત્રિદિને મર્ત્ય ઉપવાસી જિતેન્દ્રિયઃ ।
નિશામધ્યે શતાવર્તપઠનાચ્ચિન્તિતં લભેત્ ॥ ૧૪૪॥

સહસ્રાવર્તનં તત્ર તીર્થે હ્યશ્વત્થસન્નિધૌ ।
પઠનાદ્ભુક્તિર્મુક્તિશ્ચ ભવતીહ કલૌ યુગે ॥ ૧૪૫॥

તદ્દશાંશઃ ક્રિયાદ્ધોમં તદ્દશાંશં ચ તર્પણમ્ ।
દશાંશં માર્જયેન્મર્ત્યઃ સર્વસિદ્ધિઃ પ્રજાયતે ॥ ૧૪૬॥

ગતં રાજ્યમવાપ્નોતિ વન્ધ્યા પુત્રવતી ભવેત્ ।
કુષ્ઠરોગાઃ પ્રણશ્યન્તિ દિવ્યદેહો ભવેન્નરઃ ॥ ૧૪૭॥

સહસ્રાવર્તપાઠેન મહાકાલપ્રિયો નરઃ ।
મહાકાલપ્રસાદેન સર્વસિદ્ધિઃ પ્રજાયતે ॥ ૧૪૮॥

શાપાનુગ્રહસામર્થ્યં ભવતીહ કલૌ યુગે ।
સત્યં સત્યં ન સન્દેહઃ સત્યઞ્ચ ગદિતં મમ ॥ ૧૪૯॥

અવન્તિકાસ્થિતતીર્થેષુ પાઠફલમ્ ।
  કોટિતીર્થે -
કોટિતીર્થે પઠેદ્વિપ્ર! મહાકાલઃ પ્રસીદતિ ।
  રુદ્રસરોવરે -
પાઠાચ્ચ રુદ્રસરસિ કુષ્ઠપીડા નિવર્તતે ॥ ૧૫૦॥

  સિદ્ધપીઠે -
સિદ્ધપીઠે પઠેદ્યો હિ તસ્ય વશ્યં ભવેજ્જગત્ ।
  શિપ્રાકૂલે -
શિપ્રાકૂલે પઠેત્પ્રાજ્ઞો ધનધાન્યયુતો ભવેત્ ॥ ૧૫૧॥

કાલત્રયં પઠેદ્યશ્ચ શત્રુનિર્મૂલનં ભવેત્ ।
  ભૈરવાલયે -
અપમૃત્યુમપાકુર્યાત્ પઠનાદ્ભૈરવાલયે ॥ ૧૫૨॥

  સિદ્ધવટસ્યાધઃ -
સિદ્ધવટસ્ય ચ્છાયાયાં પઠતે મનુજો યદિ ।
વન્ધ્યાયાં જાયતે પુત્રશ્ચિરઞ્જીવી ન સંશયઃ ॥ ૧૫૩॥

  ઔખરે -
ઔખરે પઠનાત્ સદ્યો ભૂતપીડા નિવર્તતે ।
  ગયાકૂપે -
ગયાકૂપે પઠેદ્યો હિ તુષ્ટાઃ સ્યુઃ પિતરસ્તતઃ ॥ ૧૫૪॥

  ગોમત્યાં -

ગોમત્યાઞ્ચ પઠેન્નિત્યં વિષ્ણુલોકમવાપ્નુયાત્ ।
અઙ્કુપાતે -
અઙ્કુપાતે પઠેદ્યો હિ ધૂતપાપઃ પ્રમુચ્યતે ॥ ૧૫૫॥

ખડ્ગતાસઙ્ગમે -
ખડ્ગતાસઙ્ગમે સદ્યઃ ખડ્ગસિદ્ધિમવાપ્નુયાત્ ।
યમતડાગે -
પઠેદ્યમતડાગે યો યમદુઃખં ન પશ્યતિ ॥ ૧૫૬॥

નવનદ્યાં -
નવનદ્યાં પઠેદ્યો હિ ઋદ્ધિસિદ્ધિપતિર્ભવેત્ ।
યોગિનીપુરતઃ -
યોગિનીપુરતઃ પાઠં મહામારીભયં ન હિ ॥ ૧૫૭॥

વૃદ્ધકાલેશ્વરાન્તિકે -
પુત્રપૌત્રયુતો મર્ત્યો વૃદ્ધકાલેશ્વરાન્તિકે ।
પાઠસ્થાને ઘૃતં દીપં નિત્યં બ્રાહ્મણભોજનમ્ ॥ ૧૫૮॥

એકાદશાથવા પઞ્ચ ત્રયો વાઽપ્યેકબ્રાહ્મણઃ ।
ભોજનં ચ યથાસાધ્યં દદ્યાત્ સિદ્ધિસમુત્સુકઃ ॥ ૧૫૯॥

વિધિવદ્ભક્તિમાન્ શ્રદ્ધાયુક્તો ભક્તઃ સદૈવ હિ ।
પઠન્ યજન્ સ્મરઁશ્ચૈવ જપન્ વાપિ યથામતિ ।
મહાકાલસ્ય કૃપયા સકલં ભદ્રમાપ્નુયાત્ ॥ ૧૬૦॥

ઇતિ શ્રીપ્રકૃષ્ટનન્દોક્તાગમે શ્રીકૃષ્ણસુદામ્નઃ સંવાદે
મહાકાલસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ।

॥ ૐ નમો નમઃ ॥ શિવાર્પણમસ્તુ ।

Encoded Sivakumar Thyagarajan shivakumar24xi at gmail.coM
Proofread by Sivakumar Thyagarajan, DPD, NA, PSA Easwaran

*Shri Mahakala Sahasranamastotra*
pdf was typeset on February 28, 2023

Please send corrections to *sanskrit@cheerful.com*